Roll No. ........................... Total Printed Pages - 4

# F - 3544

## M. A. (Final) Examination, 2022
## Sanskrit
## Paper Eighth
## (साहित्यसिद्धान्त)

*समयः घण्टात्रयम् )* *(सम्पूर्णाङ्काः 100*

सूचनाः -सर्वे प्रश्नाः समाधेयाः।

1. (अ) कयोश्चिद् **द्वयोः** कारिकयोः व्याख्या कार्या 10

(i) अलङ्कृतिरलङ्कार्यमपोधृत्य विवेच्यते।

तदुपायतया तत्वं सालङ्कारस्य काव्यता।।

(ii) साहित्यमनयोः शोभाशालितां प्रति काप्यसौ।।

अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः।।

(iii) सम्प्रति तत्र ये मार्गाः कविप्रस्थान हेतवः।

सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः।।





(iv) विचित्रो यत्र वक्रोक्तिवैचित्र्यं जीवितायते।

परिस्फुरति यस्यान्तः सा काप्यतिशयाभिधा।।

(ब) कुन्तकमतेन वाक्यवक्रतां निरूपयत्। 10

**अथवा**

वक्रोक्तिकारमतेन काव्यप्रयोजनं वर्णयत्।

**अथवा**

सुकुमारमार्गस्य वर्णनं कुरुत।

2. कयोश्चिद् **द्वयोः** कारिकयोः व्याख्या कर्तव्या। 20

(i) सरस्वती स्वादु तदर्थवस्तु निष्यन्दमानां महतां कवीनाम्।

अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविरोषम्।।

(ii) योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।

वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।।

(iii) काव्यस्यात्मा ध्वनिरितिबुधैर्यः समाम्नात्पूर्व-

स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।

केचिद् वाचां स्थितमविषये तत्वमूचुस्तदीयम्

तेन ब्रूम सहृदयमनः प्रीतये तत्स्वरूपम्।।

(iv) उक्त्यन्तरेणाशक्यं यत् तच्चारुत्वं प्रकाशयन्।

शब्दो व्यञ्जकतां विभ्रद् ध्वन्युक्तेर्विषयीभवेत्।।

3. (अ) कस्याञ्चिदे**कस्याः** कारिकायाः व्याख्या विधेया **10**

(i) इयं सा काव्यमीमांसा मींमासा यत्र वाग्लवः।

वाग्लवं न स जानाति न विजानाति यस्त्विमाम्।।

(ii) परक्रिया पुराकल्य इतिहास गतिर्द्विधा।

स्यादेकनायका पूर्वा द्वितीया बहुनायका।।

(iii) मानिषाद! प्रतिष्ठां त्वमगमः शाश्वती समाः।

यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।

(ब) आचार्य राजशेखर मतेन प्रतिभायाः विवेचनं कुर्यात्। **10**

**अथवा**

आचार्यराजशेखरमतेन काव्यकविभेदान् सविस्तरं वर्णयत।

4. केषाञ्चित् **चतुर्ण्णां** विवेचनं कुर्यात्। **20**

(i) पदौचित्यम्

(ii) गुणौचित्यम्

(iii) प्रबन्धौचित्यम्





(iv) क्रियौचित्यम्

(v) लिङ्गौचित्यम्

(iv) उपसर्गौचित्यम्

(vii) देशौचित्यम्

(viii) सत्वौचित्यम्।

5. 'वक्रोक्तिकाव्यजीवितम्' इत्युक्तिः समीक्ष्यताम्। **20**

**अथवा**

'वाक्यं' रसात्मकं काव्यम्' इत्युक्तिः साधनीया।